द्भूस्वस्योतिनञ्क्॥वृत्रहत्यो।ब्रह्मादिष्वेवहंतेरेवक्विबेवस्तएवेतिनियमार्थंसूत्रं॥ ॥सुकर्मापापमंश्लोकेष्वेषुकृञः।एषुकृञःक्विब्भूतेसुकृता।इत्यादिउपपदेतरेपिदृश्यतेकृञ्॥ ॥सोमेसुनः।सोमसुता॥अत्रचञ्विधोनियमः॥ ॥अग्नौचेः।अग्निचित्॥नियमःप्राग्वत्॥ ॥कर्मण्यण्याख्यायां।कर्मणिचिनोतेःकिस्यात्यथास्वंपपदस्यत्यजसमुदायेनचेदाख्यागम्यतेऽपनइवचीयतेऽपनचित्॥ ॥कर्मणीनिविक्रियः।कर्मणिविश्वोक्रीणातेःक्विड्निस्यात्।क्रत्वार्थो।सोमविक्रयी॥ऽहनाश्नन्यविक्रयः॥दृशोःक्वनिश्।कर्मणिदृशेःक्वनिवेवस्यात्।चेतोपारदृश्वा॥ ॥राजनिसुधिक्रञ्गः।राजनिकर्मणिसुधिक्रञोःक्वनिस्यात्।कृतेऽत्रचेतन्तीवितण्यर्थेऽक्षिः॥राजानंयोधितवान्।राजसुधा।राजकृत्वा।सहेवासहयुधा।सहकृत्वा

॥ ॥सप्तम्यांजनेर्डः॥ अ॒ग्नेर्बु॒जे॥ तत्पुरुषेकृतिबहुलंसप्तमीडे॒रल्लुक्सरसिजेबहुलं
क्तेः सरोजे॥ ॥पञ्चम्यामजातौ॥ जातिवर्जेपञ्चम्यन्तेजनेर्डः स्यात्तत्पुरुषेबहुव्रीहौ सं
स्कारजः॥ अजातौकिं॥ अश्वाजातः॥ ॥उपसर्गेचसंज्ञायां॥ अजः॥ ॥अन्येष्वपि
दृश्यते॥ अन्येष्वपिदेशेजनेदृश्यते॥ अजः॥ द्विजः॥ ॥सुयजोर्ङ्वनिप्॥ आभ्यांङ्वनिप्
स्यात्तत्पुरुषेखल्वायज्ञे॥ ॥जीर्यतेरट्च॥ जरत्॥ ॥क्तक्तवतूनिष्ठा॥ एतौनिष्ठा
संज्ञौस्तः॥ ॥निष्ठाक्तोर्निष्ठासंज्ञःप्रत्ययःस्यात्कृतेतयोरेवकृत्यतृच्काव्यकर्म
णिकः॥ कर्तरिकृदितिकृत्वसुः कर्तरि॥ उक्तावितौस्तांमया॥ कृतस्त्वयाविष्णु
र्विष्णुंविष्णवेवाकृतवान्॥ निष्ठायामण्यदर्थेणयदर्थेभावकर्मणि॥ ततोन्यत्रनिष्ठायां ९५
क्रियोदीच्यैःस्यात्॥ ॥क्रियोदीच्यैः॥ दीच्यैःक्रियोनिष्ठातकारस्यनः स्यात्॥ क्षीण

वाच्यात्रावकर्मणिकृतिःकामोमया॥ ॥श्रुकः किति॥ श्रियएकाचउगेताच्यस्य
किति॥ इणस्यात्॥ श्रितंश्रितवान्श्रितः॥ द्रुतवाच्यात्॥ द्रुतःजणतेर्णुवद्भावोवाच्यः॥ तेनैका
च्त्रेट्॥ जूर्णुतेःवृतः॥ ॥रदाभ्यांनिष्ठातोनःपूर्वस्यवदः॥ रेफदकारान्त्योपरस्यनिष्ठात
कारस्यनःस्यात्तःपूर्वदस्यवाभ्यां॥ क्षीणः॥ निन्नः॥ ॥संयोगादेरातोधातोर्यण्वतः॥ यण्सं
योगादेरादंताद्धातोर्निष्ठातकारस्यनःस्यात्॥ डाणः॥ ल्वा॥ ॥लानः॥ दिव्यः॥ एकविंशते
र्ल्जादित्त्वेनिष्ठातस्यनःस्यात्॥ ल्वनः॥ ज्या॥ यहिज्या॥ जीनः॥ डुद्रोदीर्घाच्छ्वनः॥ श्वन
॥श्वत्रोविनाद्योःश्वनायवाः॥ अंतमन्यत्॥ सितोतेर्योमकर्मकट्टकस्यनत्वेसितोया
सःद्वयमेवाऽऽदितश्चाऽऽदितोक्तोर्निष्ठातोनःस्यात्॥ चुजोकौटिल्योद्युगः॥ ऊदुपधाद्गो
पधहीणः॥ स्वादयऽऽदितः॥ षुञ्॥ ष्टुञ्॥ डीङ्॥ दीङ्॥ धीङ्॥ मीङ्॥ रीङ्॥ लीङ्॥ व्रीङ्॥ नवतेऽऽदितः॥ षुञ्॥

स्तनः।स्तनवाश।दूनः।दूनवाश।ऊर्दिनमध्यपाठबलान्नेट्।उडीनः।स्फायः स्फी निष्ठा
यां।स्फायः स्फी स्यान्निशायां स्फातः।येतिकेचित्।स्फीतः॥ ॥डवस्त्रित्स्यङीयोः रपः।
डवस्यस्त्रैकात्रिन्यस्यङीवार्थेरेपडः संप्रसारणंस्यान्निष्टायां।इयाः स्यङी॥ रेपेडोनि
ष्ठातस्यनःस्यात्।अस्यङीर्घहलंः शतिदीर्घः शीनेट्ङतेः।अस्यङीकिं।शीतेऽजले॥डवस्त्रि
स्यङीयोः किंसंज्ञयानोदश्यकः।शीताऽकेऽजलेतडत्यर्थः॥ ॥प्रतेश्चाप्रतिज्ञवेरेपडः संप्र
सारणंस्यात्।निष्ठायां।अकात्रिन्योऽस्यङी।प्रतिशीनः॥ ॥विन्ताषान्यक्षस्वैस्या।अ
न्यवस्वैस्यङीनिष्ठायांवासंप्रसारणंस्यात्॥अन्विङीनेट्।अन्विशीनेट्ङतेः।अवश्यानः
अवशीनोदश्यिकः।न्यवेस्वैकेनेहासमवश्यानः॥ ॥अंचोनपादाने॥अंचोनिष्ठा ९६
तस्यनःस्यात्।नत्वपादाने।समक्तः।अनपादानेकिं।उदक्तमुदकंक्तयात्र॥ ॥दिवो

निष्ठातस्यनःस्यात्॥अविजिगीषायां।।सनीवंतेतिविकल्पितेडत्वात्र॥ ॥यस्यविन्ता
षायस्यक्षतेःक्वचिद्विनाषाडडुदितस्ततोनिष्ठायामिगमस्यवा।क्षनः।विजिग्यी
षायांडाक्षतेर्ज्ञश्रुछेक्षनो।यद्विज्ञाःस्कोरितिलोपःनत्वानस्यासिद्धत्वात्रषत्वेऊत्वेव
प्राप्तेनिष्ठादेशःषत्वस्वरप्रत्ययेद्विर्भावसिद्धोवाच्यः॥इतिमूलोनावात्रनषत्वं॥दक्षः
॥ ॥निर्वाणोस्वाते॥अयंनिष्ठायांनिपात्यतेनडवातेर्वाच्यः।निर्वाणोदीयोऽनिर्वाणवा
तिऽनिर्वीतोवातः॥ ॥शुष्यःकः॥शुष्कोनिष्ठातस्यकःस्यात्।शुष्कः॥ ॥पचोवःपक्वेनि
ष्ठातस्यवःस्यात्।पक्वः॥ क्षायोमः।क्षाम्यःपरस्यनिष्ठातस्यमःस्यात्।क्षामः॥क्षामवा
दः॥ ॥म्रक्ष्योन्यतरस्यांम्लक्ष्वीत्त्वाभ्यांतेनिष्ठातस्यमोवास्यात्॥ ॥स्यःप्रस्वैस्या॥प्रा
स्यःसंप्रसारणंस्यान्निष्ठायांहलऽतिदीर्घःश्नीमःमत्वान्तोवपक्वेयपक्तऽत्यस्यसंप्र

सारणंप्रत्यसिद्धत्वान्नत्वाभावः।प्रस्रीतः।प्राक्रिंस्यानेवृते॥ ॥अनुपसर्गात्कुल्लदी
वक्रशोल्लाघाः।एतेनिष्ठांतानिपात्यंते॥नचेत्यादेःपरेस्युः।निफला।कुल्लः।क्लीवोम
त्रः।कृशस्तनुः॥हृष्टस्तनुः।परिकृशश्च॥उल्लाघोनीरोगः॥अनुपसर्गात्किं॥ ॥आदि
तश्च॥आकारेनोनिष्ठायाइएनस्यात्॥ ॥तिक्ता॥तादौकितिपरेचरफलोरतउत्पा
त्॥प्रकुल्लः।प्रक्लीबितः।प्रकृशितः।प्रलाघितः।उत्कुल्लंकुल्लयोरुपसंख्यानं॥
॥उदविदोदत्राद्यादीत्योन्यतरस्यां।एत्योनिष्ठातस्यनोवास्यात्॥उन्नः।उत्नः।वि
दविचारणे।विन्नः।वित्नः।उंदीक्लेदने॥ ॥श्वीदितोनिष्ठायां॥श्वयतेरीदितश्चनिष्ठायो
इएनस्यात्॥उन्नः।उत्नः।त्राणः।त्रात्नः।घ्राणः।घ्रातः।क्षीणः।क्षीतः।विज्ञेसुविदितः॥वि ९७
घतेःविन्नः॥ ॥नध्यारव्याधृसृछिमदांएत्योनिष्ठातस्यनोनस्यात्॥ध्यातः।ख्यातः

श्रन्नः।राल्लोपः।श्रन्नः।मन्नः।वित्तोत्तोगप्रत्ययोः॥विंदतेर्निष्ठांतस्यनिपातोयं॥त्तोप
प्रतीतेवार्थीवित्तेधनेविन्नःपुरुषः।अनयोःकिंवित्ताभित्तशकलं।भिन्नमन्यत्र
॥ ॥ऋणमाधमर्ण्यंणतन्निपात्यतेऽधमर्ण्यव्यवहारेऽन्यत्र॥ ॥इएनिष्ठायां॥
निरःकुषोनिष्ठायामिट्स्यात्॥निष्कुषितः॥ ॥वसतिक्षुधोरिट्॥आभ्यांक्तानिष्ठ
याभ्यांनित्यमिट्स्यात्॥उषितःक्षुधितः॥ ॥अंचेःपूजायां॥पूजार्थादंचेःक्तानिष्ठयो
र्नित्यमिट्स्यात्॥अंचितःगतौतुअक्तः॥ ॥लुनोविमोहनेलूनःक्तानिष्ठयोरि
ट्स्यान्नचगार्ध्ये।लूनितःगार्ध्येउल्लुनः॥ ॥क्लिशःक्तानिष्ठयोःक्लिशःपरयोरत
यास्ड्वास्यात्॥क्लिशितःक्लिष्टः॥वमूजपिव्यवमोनिष्ठायाऽड्वुतिकेचित्॥वमि
तः।अवनासिकस्यक्वीतिदीर्घेवांतःजयितःजस्तःविश्रासितःविश्रस्तःआ

श्रमितः आश्वसः॥ ॥सऽस्था॥सऽः क्तानिष्ठयोरिडस्यात्॥सऽः क्त्वि च॥सऽः क्तानि
ष्ठावसेऽकिन्नस्यात्॥ऽस्पर्धे॥स्निद्धः॥स्नतः॥ ॥निष्ठायां डूषिदिमिदिक्ष्विदिधृषः॥एभ्यः सेऽनि
ष्ठाकिन्नस्यात्॥ऽस्नेऽनुएः॥शयितः॥प्रस्वेदितः॥प्रमेदितः॥प्रक्ष्वेदितः॥प्रधर्षितः॥
आदिकर्मणिनिष्ठावक्तव्या॥ ॥आदिकर्मणिक्तः कर्तरि च॥आदिकर्मणियः क्तः
सकर्तरिस्यात्॥चाङावकर्मणः॥ ॥वित्तोपात्तावादिकर्मणोः॥नावेकर्मणित्व आदि
तोनिष्ठायाऽडुस्यात्॥प्रस्वेदितश्चैत्रः॥स्वेदितेतेन॥मेदितोऽस्वेदितोघर्षितेते॥प्रक्षेप
स्विन्नेतेनेत्यादि॥ ॥सृघस्यिति॥स्मार्थान्मृघः सेऽनिष्ठाकिन्नस्यात्॥मर्षितः॥
तितिक्षायांकिं॥अपमृषितेवाक्यं॥ढाऽऽऽढ्रपधाङ्गावादिकर्मणोरन्यतरस्यां॥ऽ ९८
कारोपक्षत्यरोनावादिकर्मणोः सेऽनिष्ठाकिन्नस्याद्॥द्योतितेद्युतितेतेन॥प्रद्यो

तितः॥प्रद्युतितः॥अयंविधिर्द्यादीनामेवेष्यतेनद्यादिधितं॥ढा॥निष्ठायांसेटि॥सेटिनि
ष्ठायांपरतोणेर्लोपःस्यात्॥न्तावितः॥न्तावितवान्॥श्रीदितइतिनेट्॥यजादित्वात्सेप्र
सारणं॥श्नसोदीर्घः॥ढ्रढः॥चङि॥ऊदितोवेतिक्ति विकल्पितायस्य क्तिनाधेतिनि
ष्ठायानेट्॥वतः॥ततःऊदित्वान्निष्ठायांनेसतः॥मतः॥स्वेङ्कृत्वादिरुन्नावेत्यासेद्वितीयस्त्रि
तातीतइतिनिपातनादिट्॥यतितः॥अनेकाच्त्वादिट्॥दरिद्रितःजाग्नाविचिण्णिनिषु
णः॥जागरितः॥आदिकर्मणिनिष्ठायांशाकिरनिङिति॥सौनामाः॥शक्तः॥शकितोऽस्मि
ऽस्मिवस्त्रेन॥ ॥स्फुरस्फुलातधांतलमस्मिष्टविरिच्छफाढबाढानिमंथमनसमः॥शक्तावि
स्यष्टस्फुरानाघांसस्फुर्स्फुल्॥मंथादिष्वष्टस्फुडाद्यास्फोटांतानिघात्यंतेफाढमनायास
ःकषायस्नेहः॥अन्यत्रडुक्षित्तेतं॥घ्रनितेलगितं॥ध्रनितेलगितं॥स्रेछितोविस्रितं॥

फाणितंवाहितं॥ ॥ध्रुषश्चशीवैयात्योएतोनिष्ठायामविनयेअनिटौसःधृष्टः।विशस्तः
ड्रुढश्छलवलाःअनेकबलवत्त्वायेनिपातःदृढिदीप्तौदृंहितोन्यःप्रत्तोपरिदृढः।प
रिदृंहितोन्यःदृंहुगहनयोःकषः।कषोनिष्ठायामिएनस्यात्कछुगहनयोगीकष्टो
पिःकष्टंवनेकषितमन्यत्रंहुषिस्तुतौ।हुषिरविशब्दने॥हुषेर्निष्ठायामिएनस्यात्र
हुष्टारजुःविशब्दनेहुषितेवाक्यं॥ ॥अर्दःसंनिक्ष्यः॥एतत्सर्वादर्दनिष्ठायामि
एनस्यात्।समर्णोन्यर्णः॥व्यर्णः॥अर्दितोन्यः॥ ॥अर्तेश्चाविर्दूर्यं॥अर्तिश्चवोदर्दार्नि
ष्ठायामिएनस्यात्साप्ये॥अर्त्यर्णं।अर्त्यर्दितमन्यत्र॥ ॥णेरनध्ययनेवृत्तौएंतार्द्ध
यतेर्वृत्तमितिनिपात्यते।अध्ययनेर्थेवृत्तंछंदःचेणवर्त्तितमन्यत्र॥ ॥श्रृतंपाके॥ ९९
आऽर्त्यस्यश्रृत्तावोनिपात्यतेनिष्ठायां॥ ॥क्षीरहविषोःपाकेश्रृतंक्षीरंश्रृतंहवि

श्राणमन्यत्र॥ठाववादांतेशंतसर्णदस्यस्पृछन्नज्ञसाः॥एतेणिचिनिष्ठांतावानिया
यंतेपक्षेदमितःशमितःशरितःसासितःस्यासितः॥छादितःज्ञापितः॥ ॥रुषम
ल्वरसंबुषासन्नाएंभ्योनिष्ठायामिएनस्याद्वारुष्टःरुषितःश्रोतःश्रमितःत्वर्णःत्व
रितःसंबुष्टःसंबुषितः॥आश्वांतः॥आश्वसितः॥ ॥हृषेर्लोमस्वाद्हृषेर्निष्ठायामित्य
स्यात्लोमस्वर्थेहृष्टोहृषितंलोमावित्मितप्रतिघातयोश्चाहृष्टोहृषितेमैत्रःविस्मित
ःप्रतिहतोवाऽत्यर्थः॥ ॥अपचितश्चाचायतेर्निपातोयंवाअपचितःअपचायितः॥
॥प्यायःपीप्यायतेर्निष्ठायांपीत्वंस्यात्पीनंमुखंवास्थौगादन्यत्रवा॥प्यानःपी
नःस्वेदः॥सोपसर्गस्यनास्यानःआद्रवेस्रंसध्वंसोःस्यादेवाआपीनोंधुःआपीन
मूधः॥ ॥क्षादोनिष्ठायांक्षादोदृक्षवःस्यान्निष्ठायांपक्षेनन॥ ॥व्यतिस्यतिमाछामि

त्रिकिति॥एषामिकारोंतादेशःस्यात्तादौकितिपरे॥दितः॥सितः॥मितः॥छितः॥क्षा
च्छोरन्यतरस्यां॥॥क्षितः॥क्षातः॥छितः॥छातः॥ ॥श्रपतेर्नित्यमित्वंवक्तव्यं॥तेनश्रीमित्त
ब्रतेरिति॥ ॥दधस्तेर्हिः॥धाञोहिःस्यात्॥निति हितः॥ ॥दोदद्घोः॥॥खुसंज्ञकस्य दाद्
त्यस्य दद्भ स्यात्तादौकिति॥आदेशस्यतांतत्वेदस्त्रीत्तिदीर्घत्वंदोषः॥दांतत्वेनिष्टार्थमि
त्वीर्घंतत्वेत्तश्चर्त्वंस्यात्तांतस्माच्छांतः॥वर्त्वोदत्तत्वोः किंदातः॥ ॥अचउपसर्गात्त
॥अजेर्ताडयसर्गात्परस्यद्योसः स्यात्तादौ॥किति॥यतः॥अवतः॥॥अवदत्तंविदत्तंचयदं
त्तंवयदत्तंचाधिकर्मणि॥सुदत्तमनुदत्तंवनिदत्तमितिचेष्यते॥२॥ ॥दाम्नि॥॥इगंतस्यो
पसर्गस्यदीर्घः स्यात्क्तादेशेतकारेपरे॥नीतः॥सूतः॥धूमास्तीतंवधूतंगीतंपो १००
तंजनसनखनेत्यात्वंजातंमातंस्वातं॥ ॥अदोमग्धिर्ल्यपिकिति॥अदोजग्धिस्या

ल्यपितादौकितिवाङकारश्चाधत्वंझरोझरिसवर्णेजग्धः॥आदिकर्मणिक्तः॥क
र्त्रभिप्रायक्रियाफलेकर्तुःक्तःस्यात्॥कटःस्वयंनिष्पादितवान्॥॥क्तीणः समः॥ ॥वाक्रोश
दैन्ययोः॥क्षिप्रंक्षीष्टंक्षयंदीर्घंवास्यात्॥आक्रोशेदैन्यंचगम्यमाने॥क्षीणोयुवतिंक्षि
तायुवतिंवशक्षीणोयंतपस्वी॥क्षिप्तोवाचावेदीर्घंवेतिकेचित्॥यक्षिप्तंयक्षीणंते
नानिनदीभ्यांस्नातेःकौशलाभ्यांस्नातेसस्पृष्टःस्यात्॥कौशलेशास्त्रेगम्यमा
नेनिष्णातः॥नदीभ्यांसुपीति॥कः॥ ॥गत्यर्थाकर्मकश्लिषशीङ्स्थासवसज
नरुहजीर्यतिभ्यश्चाधिकरणेकर्तरिक्तःस्यात्॥नावकर्मणोश्च॥गंगांगतःगंगांयाः
श्रयनःसःलक्ष्मीमाश्लिष्टोहरिः॥शेषमधिशायितोविष्णुःवैकुंठमधिष्ठितःशि
वंश्रयासितःहरिदिनमुषोषितःराममनुजातोभ्रुतःगरुडमारूढोगोविंदःवि

श्रमक्लमजीर्णानेतः।पदेत्रा मागंगावेनेत्यादि।।शीङादेरकर्मकेष्वप्युपसृष्टस्यसक
र्मकत्वात्तथाशक्तिः।। ।क्तोधिकरणेचध्रौव्यगतिप्रत्यवसानार्थेभ्यः।।निश्चलार्थो
ऽत्यर्थोङोजनार्थोद्यधिकरणक्तःस्याद्यथासंख्यंकुंदस्यासितमिदमिदंया
तेरमापतेः।।छक्तमेतदनेतस्मात्सुगोप्यादिदृश्यवः।।लुक्तमेषामस्मीतिमत्यर्थीया
कारणेचक्तोःपीताइत्यादिस्याद्वा।। ।जीतःक्तः।।जीतोक्षतोर्वैनेमानेक्तःस्यात्।।
।जिदाःजिर्ईर्ध्वा।। ।मतिबुद्धिपूजार्थेभ्यश्च।।एतदर्थेभ्योवर्त्तमानेक्तःस्यात्।।
ज्ञोमतःदृष्टःदृःविदितःसूजितःअर्चितःचादनुक्तमपिशीलितोरक्षितः
कांतआक्रीडानुभूतइत्यपि।।उषश्रुषितश्चोन्तावन्तिव्याहृतइत्यपिसुप्तःशयिस्त्रि १०१
इत्यादयोदृष्टप्रयोगतथाकांतस्त्रीनोसंयुतोद्यतो।।आसितःशयितःसुप्तोलुप्तःसृप्त

श्चसंमतःज्ञेयाः।।ठानसुंसकेनावेक्तः।।क्षतोःक्तःस्यात्तावेर्थेसच्चक्षीवे।।हसितं
।जल्पितंशयितोछ्वसितस्या।।ळालिटःकानज्वा।।लिटःकानजादेशोवास्यात्।।छंदसि।।
यद्योगवशात्क्वचित्प्रीतिकेचित्।।तडानावात्मनेपदंलिटिक्षतोरनन्यासस्यतिद्वि
त्वादिावक्राणः।। ।क्वसुश्चालिटःक्वसुरादेशोवास्यात्।।बित्तज्वा।।जाग्रोचीत्य
त्रइकारउच्चारणार्थः।।तेनक्वसावपिनगुणः।।जजागरिवा।।येषांनोच्चारणार्थस्ते
षांक्वसोगुणः।।जजागरीवा।। ।।वसेकाजाद्वसः।।क्तक्तवतूनामेकावामादंतान्तो
द्यसेश्चपरस्यवसोरिडस्यात्।।नान्येषां।।आदिवा।।आदिवादादिडातेरशिति
नित्याल्लोपित्वेनआदंतत्वात्तावेट्।।ददिड्वा।।जक्षित्वा।।एषांकिंकुत्र
वांसो।।कुत्रवांसःवसोसंप्रसारणं।।वुगागमः।।क्तवतुषःवन्नविषावक्तवतुषीव

सुसंसुध्वंस्विति दः। बन्त्ववश्चावकारादौ क्तिन्छौ श्चटोवेति केचित्। डुक्ञाञ्। दिदिवाञ्। दिदिवुषः॥ विविशियाञ्॥ विविक्षाञ्॥ ॥विन्नाषागमहनविदविशां॥ एन्योवमो रिङ्वास्यात्॥ जग्मिवाञ्। जगन्वाञ्॥ जघ्निवाञ्। जघन्वाञ्॥ तौदादिकौ विदविशी॥ विविदिवाञ्। विविद्वाञ्॥ विविशिवाञ्। विविश्वाञ्॥ दृशश्चतिवाच्यो ददृशिवाञ्। ददृश्वाञ्॥ ॥दाश्वात्साञ्नमीड्वांश्चाएतेक्वसंता निपात्यते॥ ॥उयेयिवानन्वाश्चानश्चान श्चाएतेनिपात्यंते। नात्रोपसर्गः सत्रे। नान्योपसर्गोत्तनिरुपसर्गोऽक्तवत्येवइयि वाञ्॥ जाग्रेः कौलविषुणोवेतिकेचित्। जजाग्वाणः। जजागराणः॥ ॥लटः शतृ शानचावप्रथमासमानाधिकरणे॥ लटः स्थानेशतृशानचौस्तः। प्रथमयाचेदेकार्थे तानाः। तस्यशावादिः। पचेतेचैत्रेपश्य॥ पचतोचैत्रेणकृतेतडानावित्यात्मनेपद १०२

संज्ञाः कर्तृगेफलेशानश्॥ ॥आनेमुक्॥ आनेपरेऽदंतस्यागस्यमुगागमःस्यात्। पचमानंचैत्रंपश्य। पचमानेनचैत्रेणकृते॥ पुनर्लडुक्तैः प्रथमसमानाधिकरणेयि क्तचित्। सश्चिक्ष्विदानीमाद्यःकोशोमापचशामापचमानः। मापचत्वित्यर्थः॥ ॥संबो धनेचहेपचमान॥ ॥लक्षणहेत्वोः क्रियायाः॥ क्रियायाहेतौलक्षणेचार्थेसतोक्ष तोः लटःशतृशानचौस्तः। शयानाचेजतेयवनाः। अस्तेर्यच्चसति। कृत्यचः। प्रयीय माणः सोमः। ईदासः। आसः परस्यानसइत्यात्। आदेः परस्येत्यादेरवा। आसीनः ॥ विदेः शतुर्वसुः। वेत्तेः परस्यशतुर्वसुरादेशोवास्यात्। विदशः। विद्वाञ्। विदुषी॥ ॥तोसत्। शतृशानचोसत्संज्ञास्तः॥ ॥लटःसद्वालटःसत्संज्ञादेशोस्तोवा॥ व्यव स्थितविकल्पेनप्रथमैकार्थेदिक्षु नित्यमन्यत्रवा। करिष्यंतंकरिष्यमाणंहेकरि

प्यशाअर्जेयिष्यन्नसति॥प्रथमेकार्थेलेकरिष्यतिःकरिष्यश॥ळाअङ्गजोःज्ञानशाच्या
च्योःज्ञानशप्रत्ययःस्यात्॥यजमानःयजमानः॥ ॥ताच्छील्यवयोवचनशक्तिषुवानञ॥
एषुगम्येष्वर्थेषुतोः नशस्यात्तान्तोगंतुंजानःकर्तुंवेत्याणः॥शक्तृनिघ्नानःळाइङ्
क्षार्योःशत्रकृच्छिणि॥आत्मांशत्रुस्याश॥अकृच्छ्रिणिकर्तरिश्रधीप्सश्रधारयश॥द्विषो
मित्रेद्विषश॥अमित्रेकिंयतिंहेष्णन्त्यर्थो॥ ॥अर्हेःप्रशंसायां॥अर्हश॥ ॥आक्रो
स्तच्छीलतद्धर्मतत्साधुकारिषु॥इतःपरक्विपमन्तिव्याख्येयंप्रत्ययास्तेतच्छीलादिषुद्रे
याः॥ ॥टशाध्यैस्तृशस्यात्तच्छीलादौ॥कर्तरिवराश॥ ॥अलंकृञ्निराकृञ्प्रजनो
त्पवोत्पतोन्मादेषुचपदरुजविशस्पृशश॥एत्यऽस्पृशस्यात्तातच्छीलादौ॥ १०३
अलंकरिष्णुःचरिष्णुरित्यादि॥ताच्छीलिकेवुमरूपन्यायोनातेनालंकर्तीतिनएः

छंदसि॥एंपतादिस्थुक्त्यात्छंदसिलोकोपीतिकेचिदाकरत्विष्णुःचुवश्चान्तविष्णुः
चादयुक्तेपि॥नादिष्णुः॥ ॥स्नाजिस्थश्वरुः॥एत्यःकमनःस्यात्तच्छीलादौ॥वाडुदश्रा
स्थास्नुःगिलान्नुपूर्वःजिष्णुःस्थास्नुःश्नुकंकितीत्यत्रगकारश्लेषान्नेड॥त्रस्नुः॥ ॥
त्रसिगृधिधृषिक्षिपेःक्नुःएत्यःक्नुःस्याडुकेर्थी॥त्रस्नुःत्यादिर्मेक्षिपश्रपरिसृजःस्नुरि
तिकेचिन्नास्नुःक्षेष्णुःपरिमार्ष्णुः॥ ॥चलनशब्दार्थादकर्मकाद्धश्रअकर्मकोत्र
चलनार्थोछब्दार्थोघुश्चस्याडुकेर्थी॥चलनःकंपनःशब्दनःखणःअकर्मकाक्विं॥प
वितावित्र॥ ॥अवदात्रेतश्चहंलादेःहलोयश्चदात्रेतोयुश्रावश्रेनः॥ ॥लषपतपदा
स्थात्रुषहनकमगमशृत्रुंजकज्ञा॥एत्यऽलकञ्स्याडुकेर्थी॥लाषुकःपाडुकःस्थायुक
ःनाशुकःवाशुकःद्राडुकःकाशुकःगामुकःशासुकः॥ ॥जल्पभिक्षकुट्टलुण्टवृङ्

षाकञ्॥एत्यः षाक्स्याड्डकेर्घोजल्पाकः।जल्पाकीवराकः।वराकी॥इत्यादि॥ ॥स्पृ
हिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्यआलच्॥एत्यआलुच्स्याड्डकेर्थेस्पृहयालुः॥
गृद्ध्यर्हणेगृहयालुः।पतयालुः।एतेभ्यस्तच्छुरादावदंताः।दयालुः॥निशब्दोद्रातिः
॥निद्रालुः।तत्संबोद्रातदानींततोनियात्यते॥तंद्रालुः॥श्रद्धालुः॥शीङोवायः।शा
यालुः॥ ॥दाधेट्शिशादसदोरुः॥एत्योरुःस्याड्डकेर्थेदारुः।ध्वरुः।शेरुः।शडुःस
डुः॥ ॥सृद्धस्यदःक्मरच्॥एत्यःक्मरच्स्यात्॥सृमरः।घस्मरः।अघ्नरः॥ ॥नेऽजा
समिदोद्युरच्॥एत्योद्युरच्स्यात्।नेजेःकर्मकर्तरिचित्वात्तऊत्वं।नेयुराःनाशुरः।
मेदुरः॥ ॥विदिनिष्टिछिदेःऊरच्॥एत्यःऊरच्स्यात्।वेत्तेरत्ययहणं।विदुरः॥ १०४
त्तिदिछिदोःकर्मकर्तरि।निडुरः।छिडुरः॥ ॥इणनशिजसत्वित्यःकरशाएत्यःकर

श्स्याड्डकेर्थे॥पित्वाल्लुक्॥श्वरःनश्वरः।जित्वरः।सृत्वरः।सृत्वरीगत्वरश्च।अत्रेनि
यात्यतोगत्वरी॥ ॥जागृस्तूकः॥जागर्तेरूकःस्यात्।जागरूकः॥ ॥यजजपदशांय
ङः॥एत्योयङंतेत्यर्थकःस्यात्।यज्यङ्सन्यङोःदीर्घोकितः।यायज्या।आतोलोपः
।यस्यहलोत्यलोपः॥यायज्यूकः।जंजपूकः।दंदशूकः।वदेश्चावावडूकः॥ ॥नमिकं
पिस्म्पृजसकमहिंसदीपोरः।नम्रः।कंपः।स्मेरः।जसमोहणे॥नन्द्रयैः।अजस्रंसतत
मित्यर्थैः।कंमुः।हिंस्रः।दीप्रः॥ ॥सनाशंसाभिक्षउः।सनेतादाशंसितिक्षित्यांचउः
स्यात्।सन्यातः।अतोलोपः।रिरिक्षुः।आशंसुः।रिक्षार्थस्याग्रहणं॥आशंसुः।लिङुः॥ ॥
विडुरिच्छुः॥एतोनियात्यौ॥वेदनशीलोविंडुः॥एषणशीलश्छडुः।नाषाध्यांध्यक्रु
सूजनिनमिगमिन्यः किकिनोक्त्र्योतोवलिडूत्र।द्वित्वादधिः।चक्रिः।समित्रिः।जङ्गिः।

नेमिः।जग्मिः।सहिवहिचलिपतिन्यः।यङंतेभ्यः।किकिनौवाच्यौ।सासहिः।वावहिः।
चावलिः।पापतिः॥ ॥स्वपिहशोर्नेजिङः।आभ्यांनजिङ्स्याङ्क्ङिति।अश्नुङ्
॥हश्नुङौ।हशोयीतिकेचित्।घ्वसङ्॥ ॥ष्ठिवेघोरुः॥आभ्यांआरुःस्यात्॥शारुः।
वंदारुः॥ ॥क्ष्नियःऊङुकनौ।क्नीरुः।क्नीलुकः॥ ॥ऊकञ्पिवाच्यः।क्नीसुकः॥ ॥ष्ठि
ञ्नासपिसकसोवरङ्॥एभ्योवरङ्स्यात्।स्थावरः।ईश्वरः।नास्वरः॥पेस्वरः।कस्व
रः।प्रमद्वरोयीतिकेचित्॥यस्त्रयङः॥यातेर्यङंताद्वरङ्स्यात्।अतोलोप॥लोपोव्य
लि॥नपदांतेत्यनेश्वरविआतोलोपस्यस्थानिवत्वान्नावाल्यंयावरः॥ ॥त्रिजन्ना
सप्तविंशतेर्जिघृजुंश्रावसुवःक्विशाएभ्यस्त्रीलादौक्विपुस्यात्॥विश्वाड्नाः।
भः।विश्वव॥ऊर्क्।ऊर्जवतेर्दीर्घश्च।ऊर्जायावसुर॥ ॥अन्येभ्योपिदृश्यते॥अ

न्येभ्योपिक्विप्दृश्यते॥तच्छीलादौ।नित्ताक्षित्ताक्षिब्विप्छायतस्कटपृजुश्रीणांदीर्घो
ऽसारणंवावत्यनद्याःवाक्॥इच्छतीतिग्राट्॥आयतेस्त्रौतिःआयतस्त्रः।कटंग्रवतेकट
ग्रः।जवतीतिज्रः॥श्रयंत्यतेःश्रीः॥धृतिगमिजुहोतीनांदीर्घश्चाघोतेर्दिक्ता॥गच्छतीति
जगत्॥जुहोतेर्दीर्घश्चाजुहोत्यनयाजुहूः।ध्यायतेःसंयसारणंवाधीः॥ ॥दृन्नमे॥
अस्यक्तिक्नसेवा॥दीर्यतेःदृढ्॥क्रुंयरिक्रंजादीर्घश्चेतिकेचित्।श्रवतीतिश्रुः।द्र
वतीतिद्रुः॥परिक्रजतीतियरिक्राट्।दृग्रियदृणात्रमित्रेङ्कयनीतिमित्रङ्रः।वयतीति
जूः।आप्यायतेःआपीःइत्यादि॥ ॥क्नुवःसंज्ञांतरयोः।क्नुवःक्विप्स्यात्संज्ञायांम
तेरन्यामित्रक्नूः॥ ॥विप्रश्नोडूसंज्ञायां॥एभ्यःपराड्वोडुःस्यान्नक्षसंज्ञायां॥विड्
।प्रड्।शोड्॥मितद्वारादश्च॥मितड्॥शोड्।स्वयंड्॥ ॥दाधृनीशस्मुयुजसुउ

दसिसिचमिहपतदहनहःकरणे॥दाप्ऋदेरुश्स्याकरणेर्थे॥दात्यनेनदात्रंनो
सशस्त्रं॥योत्रंयोक्त्रं॥स्रोत्रंतोत्रंसेत्रंसेक्त्रंमेढ्रंपत्रंदंष्ट्रा॥नधी॥ ॥ऋत्विक्त्वध्रुस्र
क्वनसहवरुत्रःएन्यःकरणेऽत्रःस्यात्॥ऋत्विग्त्वेलत्विग्त्वेऽत्यादि॥ ॥ऊवःसेज्ञायां
॥ऋस्मात्करणेऽत्रःस्यान्नाम्नि॥पवित्रंदर्भः॥ ॥उणादयोबहुलं॥उणादयःपत्यया
वर्त्तमानेसंज्ञायांबबहुलंस्युः॥तेकेचिद्विदिताःकेचित्प्रयोगाडुनीयंते॥संज्ञासुभ्रातृ
रूपाणिप्रत्ययाश्चततःपरे॥कार्यीविद्यादत्रबंधमेतच्छास्त्रमुणादिषु॥१॥ ॥कृपावा
जिमिस्वदिसाध्यशूभ्य॥उण्॥कारुः॥वायुः॥पायुः॥मायुः॥स्वादुः॥साधुः॥आशुः॥ग
मेर्डोगोः॥ ॥स्थाभ्रुक्षिन्योंडोः॥स्फोः॥नोः॥ ॥सितनिगमिमनिसन्यविधिभ्यश्छन्दसि॥न्य १०६
सुश्॥सिवः॥तंवः॥क्रोष्टाइत्यादि॥ ॥ऋविद्दृतंत्रिन्यइः॥ऋवीः॥तरीः॥स्तरीः॥तंत्रीः॥

॥ ॥लक्ष्मेर्डुद्वा॥लक्ष्मीः॥ ॥संख्यानेख्यायतेर्ड्ड॥संख्यानेख्यीत्वं॥ङीश्चख्यीः॥ ॥ऋविशिन्योव
॥ऊरंतावेशंतः॥ ॥गंडिमंडिजनिनंविन्यश्च॥एतेणिजंताः॥गंडयंतः॥मंडयंतः॥जनयंत
॥नंदयंतः॥ ॥स्फुरत्स्फिरस्फुलद्विन्यआत्यः॥आवाय्यः॥दात्राय्यः॥स्फुलाय्यः॥गृह।
व्याय्यः॥दराय्यः॥जयाय्यः॥ ॥स्तनिहनिषुषिगदिमदिहदिन्योणरञ्चाएन्योणंतेन्य
श्चुश्स्यात्॥ऋदंतत्वानद्यादि॥स्तनयित्नुः॥हूषदित्नुः॥पोषयित्नुः॥गदयित्नुः॥मद
यित्नुः॥ ॥हृदयित्नुः॥ ॥कृसृभृजातृन्यःक्तिच्॥कीर्तिः॥गीर्तिः॥सृतिः॥ऋतिर्णलीस्तु
क्तेर्नुणः॥जातृतिः॥ऋभुनांदक्षःप्रभुक्षाः॥ ॥तुमुणुलौक्रियायांक्रियार्थायां॥क्रि
यार्थायांक्रियायामुपपदेमतोर्नेविष्यतितुमुणुलोसः॥ ॥मांतत्वादव्ययत्वे॥कृष्णेड्
कृष्यति॥कृष्णंदर्शीकृष्यति॥सुनर्णिलुक्तेर्जीयतेनात्रवासरूपन्यायेनहजादयश्च॥

॥समानकर्तृकेषु तुमर्॥ अक्रियार्थायां क्रियायामर्थे यौ धातू तदर्थेऽभिधेये समानकर्तृकेषूपपदेषु धातोस्तुमर्प्रत्ययः स्यात्॥ इच्छति नो ङुः। वृष्टिं वाञ्छति वा। इच्छक्रीत्यादौ ऽप्रयोगान्न। शक्धृषज्ञाग्लाघटरभलसहार्हास्त्यर्थैः श्रुतुमर्॥ शक्नोति तो ङुः। एवं धृषादौ। अस्मिन्नवतिविद्यते वा नो ङुः। कालसमयवेलासु तुमुन्॥ एषु धातोस्तुमुन्स्यात्॥ कालः समयो वेला वा नो ङुः॥ नावव्यवहृपणश्च॥ क्रियार्थायां यः क्रियायां न विष्यति तद्वाचकादयः स्युः। जयाययाति॥ पाकं याति॥ व्रजति॥ ॥पदरुजविशस्पृशो घञ्॥ एषां घञन्तानां कालत्रये। पवाद्यजादेरन्तस्य पद्यते। सोपादः॥ रोगः। वेशः। स्पर्शः॥ ॥सुस्थिरे॥ सरतेः स्थिरकर्तरि घञ्णिति॥ सारः॥ ग्रामिमत्स्यबलेषु च॥ उपसर्गस्य घञ्यमनुष्येबहुलं दीर्घः। अतीसारः। विसारः। सारः॥ १०७
॥नाविष्ठास्त्वर्थवाच्यधातोर्घञ्स्यात्॥ ॥इकः काशे॥ काशेऽनुनासिकस्येवर्णस्य दीर्घः

स्यात्॥ नीकाशः। अवकाशः॥ इकः किं। प्रकाशः॥ ॥अकर्तरि चकारके संज्ञायां॥ धातोर्घञ्स्यात्कर्मादौ संज्ञायां विषये। संज्ञायां। ग्रास्थेति तेन ग्रासः। वादसंज्ञायामपि॥ कस्यचिद्दायो दत्तः। दारजारौ दत्तैरिणिल्लुक्॥ दारः। जारः॥ ॥एरच्॥ इवर्णान्तस्याङ्गस्य वादौ दे च। करः। गरः॥ स्तवः। लवः॥ ॥इडश्च॥ अस्माद्घञ्स्याङ्गस्य वादौ॥ नाच्॥ अध्यायः। उपेत्यस्मादधीते। उपाध्यायः॥ ॥प्रथमचरमतल्यवीर्वत्तृजन्तघञ्स्यादिस्त्रीणितार्थे। नवशब्दे॥ पटस्य विस्तारः। शब्दे तु वस्त्रो विस्तारः॥ ॥घञपोश्च। अदेर्घञि स्यादृञि अपि च॥ ॥उपसर्गादः॥ अदेः प्रादेरुपसर्गस्याङ्गस्य वादौ॥ घंञ्घसः। प्रादौ किं। घासः॥ ॥समुदेरजः पशुषु॥ संस्त्रर्वादजन्तस्य समुदेरङ्गस्य वादौ॥ पशुषु विषये॥ अघञपोरिस्त्रुक्तृवीनावो ना॥ समजः। पशुसंघः। उदजः पशुप्रेरणं॥ अन्यत्र समाजः। उदाजः। नादान्तोपदेशस्येति नस्य दीर्घः। ग्रामः। आवामादेश्च।

आचामः।कामः॥चामः॥आमादेवीः।आमः।अमः॥चामः।चमः।विश्रामः।विश्रमः।वि
श्रामोपशब्दइतिकाशिकायां॥हनस्तोविणलोः।आघातः।हनश्चवधः।हेतेरुपसर्गाद्ध
वेरप्यस्यात्॥हनोवधादेशश्च॥क्ष्णः।घ्नोपीष्टिः॥घातः॥निमिमीलियोरवलवोरात्वनि
षेधः॥निमयः।मयः।विलयः।लयः॥ ॥कर्मव्यतिहारेणस्त्रियां॥क्रियाव्यतिहारेण
मेधसतोर्णस्यात्॥नावादोसत्रस्त्रियां॥ ॥णस्त्रियामञ्॥स्त्रियांविहितोजंता
त्स्वार्थेस्यात्॥तद्धितत्वान्नद्यास्मित्योत्त्वंषा॥ ॥नकर्मव्यतिहारे॥कर्मव्यतिहारा
र्थंयत्ययेपरेनेस्यात्॥आदिदृद्भिः।टिड्ढाणि।तिङश्चावहासी॥ ॥अनित्यंचिधौनावे
स्तृणः।अनित्यंप्रयोगग्रन्थयोर्नावेस्तृणस्यात्॥ ॥अणिस्तृणः॥स्तृणोतेर्नात्स्वार्थेण
स्यात्॥आदिदृद्भिः॥स्तृणोणनपत्ये॥सोमविणवस्तृते॥ ॥उपसर्गोत्खलघ्नोः॥उपस

र्गोत्खलघ्नेर्मस्यात्॥खलेघ्नेर्वा॥खलंघ्नः॥ ॥नसुङर्त्योकेवलान्त्यो॥सुङर्त्योपर
स्यलघ्नेर्मस्यात्॥सुलाघ्नः।डलीघ्नः।केवलान्त्योकिं।सुखलंघ्नः।अतिडलंघ्नः॥॥
स्फुरतिस्फुलत्योर्घञि॥अनयोस्वआत्वंस्यात्॥घञि॥स्फारः।स्फालः॥ ॥निवास
चितिशरीरोपसमाधानेष्वादेश्चकः॥एष्वर्थेषुविनोतेर्घञ्स्यात्नात्॥आदेश्चकः॥
निवासेनिकायः।चितौ॥आकायाग्निकायः।शरीरं।राशीकरणेगोमयनिका
यः॥ ॥अनित्यंनावकरणयोः॥नावार्थकरणार्थेघञ्निरंजनेस्यलोपःस्यात्॥
रागः।अनयोः किं।रजत्यस्मिन्नितिरंगः॥ ॥स्यदोजवेनिपातेयं॥वेगोस्यदः।अ
न्यत्रस्यंदः॥ ॥अवोदैधौद्रप्रन्थग्रहिमश्रथाः॥एतेनिपात्यंते॥अवोदः क्लेदः।एध
ंधनोद्यः।वंदनोद्यश्रथः।हिमश्रथः॥ ॥डुकृञ्करणेयसतोर्भूतेनीवादौ

क्तिः स्यात्॥ ॥क्रिमिमुनित्यं॥ क्रिमुत्पत्तौ॥ तान्नित्यमस्यान्निवृत्तेर्थकरणेननिर्देशेक्रि
मिं॥ ५ क्रिमिं॥ ॥डुतोष्कृ॥ डुकृत्र्यस्यतोःकुर्स्यात्तत्नावादौ॥ वेयजुःश्रयजु
ः॥ ॥यजयाचयतविछप्रच्छरक्षोनडुः॥ एत्योनडुस्यात्त्वात्नावादौ॥ चुल्लोयज्ञः॥ या
ङ्ग्रायनः॥ छोःशऽइ॥ यज्ञेवांसेनेतिज्ञाणकान्नयधारणं॥ यज्ञःरक्षणः॥ स्वयोनइ
स्वयोनत्यङ्गावादौ॥ स्वस्रुःउपसर्गेघोः किः॥ आदावुपसर्गेधुसंज्ञाकाक्किः स्यात्वा
लावादौ॥ आतोलोपः॥ श्रेतद्धिः॥ आदिः॥ आधिः॥ कर्मण्यधिकरणेच॥ कर्मण्युप
दधिकरणेर्थेघोः किः स्यात्॥ उदकंधीयतेस्मिन्नुदधिः॥ पयोनिधिः॥ ॥स्त्रियां
क्तिऽ॥ धृतोर्त्तौवादौ क्तिऽस्यात्तदंतश्चस्त्रीलिंगः॥ कृतिः॥ बुद्धिः॥ स्मृतिः॥ क्षादृशति १०९
योगविन्नागात्क्तिरुक्तस्वः॥ यक्षतिः॥ तिवाऽत्तिः॥ कृत्तिः॥ वायतेक्तिंतिनित्यंवि

नावः॥ अपचितिः॥ कंडूयतेः क्तिऽ॥ अतोलोपः॥ तस्ययलोपेकृत्तेयेलानिवत्वान्ना
वाघलोपः॥ कंडूतिः॥ शांतिः॥ दांतिः॥ तिबुत्रेतीण्निषेधेस्मृहादीनामितिवक्तव्यानेहा
नि॒ हीतिः॥ निऋत्तिः॥ नियुक्तिः॥ उपस्निहितिः॥ म्लाज्याहात्वरित्यानिः॥ ग्लानिः॥
ज्यानिः॥ म्हानिः॥ ज्वरत्वरस्रव्यविमवामुपधायाश्चक्तिक्षिष्टावत्तेयः॥ कीर्णिः॥ ह्रीर्णिः॥ ल्वनि
॥ ष्वनिः॥ संपदादेःक्विब्वासंपत्त्याविपत्त्याप्रतिपत्त्यापदेसंपत्तिः॥ इत्यादि॥ आकृतिगणो
यं॥ ॥ग्रतिग्रतिसातिहेतिकीर्त्तयश्च॥ एतेनिपात्याः॥ अवाज्ञृतिः॥ ज्ञुज्ञतिः॥ ज्ञुज्ञति
॥ ॥ क्षिज्ञवासातिः॥ हिहंतेर्वाहेतिः॥ कृत्याकीर्त्तिः॥ ॥ व्रजयजोर्भावकर्मणोरात्मो
कर्मण्यात्मनेपदेस्त्रियांवाज्या॥ इज्या॥ स्त्रधिकारात्त्वन्नवासरूपविधिः॥ नयङ्क्षिऽ॥ भावे
क्तिः॥ कर्मादीनां॥ ॥संज्ञायांसमजनिषदनिपतमनविदभूशीङ्स्थाशपांसः॥ एत्यः

MEMORIAL

कयस्यात्संज्ञायांस्त्रियां॥अजेः कयपिवीनावोनेतिवाच्यं॥समजेतितस्यांसमज्यां॥नि
षद्या॥निषत्या॥मद्या॥विद्या॥सुत्या॥अयंस्त्रिक्तितिशय्या॥कृत्याऽत्या॥ ॥कृञः शवा
कृजोनावादौशःस्यात्कयञ्चास्त्रियां॥शित्याऽऽवेयकारिकुःदेशः॥क्रियाकृत्यायो
गविनागाक्तिनपि॥कृतिः॥ ॥इच्छा॥इषःत्रोनिपातोयं॥ ॥परिचर्या परिसर्यामृ
गयादयश्च॥जागर्तेरकारोवा॥जागर्या॥जागरा॥अस्यावर्यो॥इत्यविकेचित्॥
॥अयत्ययात्॥प्रत्ययोताक्षतोनीवादौस्त्रियांअस्यात्॥नक्तिङ॥चिकीर्षा॥अरा
दालोलयां॥कंडूतिरपि॥ ॥उरोश्चहलः॥हलंताद्रुमतोक्षतोरःस्याड्डावादौ॥
स्त्रियांनक्तिङ॥ईहाऽऊहाउरोःकिंनक्तिःहालःकिंनीतिःनिष्ठायांसेटइतिवा
क्तांतनेहनाश्लिःराद्धिःवशास्त्रिःअशंसेत्यपि॥ ॥षिद्भिदादिभ्योऽङ्॥क्षितो

त्तिदादेश्चाअङ्स्याड्डावादौ॥ऽदशदशोडिःगुणःडाराःत्रयाणांस्त्रयाणांमा॥दामऽत्य
स्य निःक्तिदाक्षिपायुदामेधागोधाकाराहाराताराधारालेखारेखाकृपापीडाकृ
षाऽत्यादि॥ ॥चिंतिघजिकथिकंचिवचेश्चाएभ्योऽङ्स्याऽस्त्रियांन्नावादौ॥वदमा
णाऽवोपवादःचिंतास्मृजाकथाऽकंब्यावर्चा॥ ॥आतश्चोपसर्गे॥प्रादाऽउपपदे
आवंतेभ्योऽङ्स्यात्स्त्रियांन्नावादौ॥नक्तिङ॥उपदा॥अद्धाऽश्रंतर्द्धाएषासंश्रंथोऽङ्
॥एंतात्॥आसंश्रंथिन्योश्चयङ्स्यात्स्त्रियांन्नावादौ॥कारणाऽआसना॥श्रंथना
॥ ॥घटिवेदिविदिन्यश्चाघट्टना॥वेदना॥वेदना॥ ॥इषेरनिष्ठोर्थात्॥अन्वेषणा
॥परेर्वा॥परैषणापरीष्टिःऽइषणाश्रंथनेत्यपिकेचित्॥ ॥रोगाख्यायांणषुल्र
बङ्लं॥धातोर्णवुल्स्यात्स्त्रियांन्नावादौरोगाख्यायांऽवृश्चर्दिकाविचर्चिकाबङ्लो

कः। शिरोऽस्त्रिः। धात्वर्थे निर्देशेऽण्वुल्तृचौ। आशासिका। शासिका। इक्षुतिपोधात्वर्थनिर्देशे। यचिः। नेदिः। अदिः। नवतिः। अस्त्रिः। जुहोतिः। दीव्यतिः। वर्णीक्ष्वरः। निर्देशे वेणुस्त्र्यकारः। कुकारः। गृदिफः। रफः। मत्वर्थीछोऽन्यतरस्यां। मत्वर्थीयः। इन्नजादिभ्यः। आजिः। आतिः॥ ॥ इक्षुक्ष्यादिभ्यः॥ कक्षिः। गिरिः। किरिः॥ ॥ विन्मतोर्लुक्। प्रियवश्वयोरिच्च॥ प्रियवश्वोरुपसर्गयोरिच्च। प्रियवश्वोरुपसर्गयोरिच्च। प्रियवश्वोरुपसर्गयोरिच्च।

ह्मीतिकिं।समुपछादः।समुपातिछादः।आक्रुवेत्यस्मिन्।आकरः॥ ॥गो
चरसंचरसहव्रजव्यजापणनिगमाश्च॥एतेनिपात्याः।गावश्चरत्यत्र।गोचरः।संचरंतितेन
संचरइत्यादि॥ ॥अवेदृस्त्रोर्घञ्।अवतारः।अवस्तारः॥ ॥आखिनोश्च॥आस्मात्ख
नःस्यात्।चात्घञ्।आकरणाधिकरणयोः।उंसि।आखनः।आखानः।आखनोऽडकडड
कवकावाव्याः॥उत्तरेर्थे॥आखंः।आखनिकः।आखरः।आखनिकवकः॥ ॥इषुगमियमां छः॥
स्मुखकृछ्रार्थेसुखडूकरणाधिकरणयोरितिनिवृत्तौएषुसुखसुखार्थेकृञ्यपदे
शुक्षतोः खल्स्यात्।ततोरेवेतिन्नावेकर्मण्यर्थेकृछ्रोऽङ्करः।कटोनवता।अक्र
छ्रेइषंकरः।सुकरोवा।निमिमीलियोः।आत्वान्नावात्।इषन्निमयः।ईषत्प्रमयः।सुवि ११२
लयः॥ ॥उपसर्गात्खल्घञोः।इषस्खलेनः।दुःखलेनः।सुखलेनः॥ ॥कर्तृकर्मणो

श्चन्यतरस्यां।इषदादिश्चपपदेसुकर्तरिसर्वोऽङ्वः।कर्मणिसर्वोकृञश्चखल्स्यात्॥कर्तृकर्म
णोरर्थयोरितिवाच्यात्।क्त्वाल्युटोकृछ्रेअङुराद्येनङुराद्येनत्वयतेऽङुराद्येनवेनवत
॥अक्रछ्रेइषदाद्येनवा।अनीषदाद्यःकृयते॥ईषदाद्यंकरःस्याद्येकरेनत्वेनवता॥
आतोर्युच्।ईषदादिष्वादंताद्यच्स्यान्नखल्।ईषत्यानः।सोमोन्नवता।ङ्याप्रातिः।सुपा
नःदरिद्रातेर्नेतिकेचित्।आसिसुधिदृशिधृषिसृषिभ्योसुखाद्यः।वेत्यादेःशा
सनःसुशासः।सुधर्ष्यंताऽङुर्योधनः।सुयोधनः।सुदर्शनः।सुदृशः।सुधर्षणः।सु
धृषणः।ईषन्मर्षणः।ईषन्मोक्षः॥ ॥अलंखल्वोः॥ ॥यतिषेधयोः।प्राक्तवांक्ता।प्र
तिषेधार्थयोरलंखल्वोरुपपदयोर्धातोक्तावास्यात्।दोदद्घोः।त्वाअलंदानेनाधुमा
— पीत्वाखल्वायोनेनखल्वासमानकर्तृकयोःसर्वकाले।एककर्तृकयोर्धात्वोःसर्व

कालोस्तिताङ्गीतो।क्वास्याश्च।अनुदात्तोयदेशेतिमलोपः।विश्नेनलासौतिदिव
मतेत्रेनलासुवावज्रतिघ्नत्यादेस्मुकःकितीतिनित्यमिडभावःसर्वेवियतिषेधेन।
सृवान्तवाधृवा॥ ॥क्विब्वेदम्यंदोःएतयोर्लोपोनस्याद्विपरस्कंवास्फंवाऊदि
वास्फंदिवानसेट्।क्वाकिन्नास्याद्राशयिवासङ्किं॥ ॥ऊर्वाप्रूङ्प्रूदयुधक्रुष
क्लिशवदवस॥क्वा।एन्यःसेङ्कक्वा।एन्यःसङ्कक्वाकिंस्याद्रा।प्रूडिवा।इत्यादि।क्लि
शेः।क्लिशक्नोतिवेट्।क्लिशिवा।क्लिष्टा।उदिवा।उषिवा।रुदविदेतिकिंवारुदि
त्वाविदिवा।मुखिवा।मृदीवा।नोपधात्थफांताद्वा॥ ॥नकारोपधात्थफांतात्प
रसेङ्कक्वाकित्स्याद्वाश्रथिवा।श्रेथिवा।ग्रफिवा।ग्रंफिवा।नोपधाक्किंक्वाथि १९३
वा।रफिवा॥ ॥वंचिलुंचृतश्च॥ ॥एन्यःसङ्कवाकिद्वास्याद्रावचिवा।वेचिवा

।लुचिवा।लुंचिवा।ऋतिवा।ऋत्विवा॥ ॥मृषिमृषिकृशेःकाश्यपस्य॥ ॥एन्यःस
ङ्क्वाकिद्वास्याद्रा।मृषिवा।तर्षिवा।मृष्टिवा।मर्षिवा।कृशिवा।कर्शिवा।रलोव्यु
पधात्दितिवाकिंवाघतिवाद्योतिवा।लिखिवालेखिंवा।मुपधाक्किंवत्तिवा।र
लः।किंसविवा।हलादेःकिंक्वाशिवा।रलोव्युपधिवा।सेट्किंक्वाक्वसुत्रिभ
धीरिट्वसविड्भाषिवोद्योधिवा।ग्रंथिवागतौउ।अक्वालुत्तिवा।लोत्तिवा।
लौचिमोदनेउ।लुधाजवृश्चोःक्किंग्रान्योपरस्यक्वाऽणित्यंस्याद्राजरिवा।
जरीवा।वृश्चिवा।उदितोवाऽउदितोधतोःक्वाङ्वास्याद्रा।शमिवा।अनुनासिक
स्यक्वीतिदीर्घःशंवाघवादेवित्वा॥ ॥क्रमश्चक्वि॥ ॥क्रमउपधायावादीर्घस्य
द्रा।फलादोक्विपरे।क्वांवा।क्वंवा।फलिकिं।क्वमिवा।सङ्ग्रतिवेट्।पविवा।पूवा

॥ ॥जोतनशीलविनाशः॥ ॥जकारोतानोनशेश्चक्लोपोवास्यात्क्विपरेनक्का॥
नेक्कारस्कारंस्कानक्षानेक्षाःफलादोवाच्योनेदः॥ग्रेडिवाजनसनेत्यादौ॥खात्वा॥
खनिवा॥घतिस्यातीवा॥दिवा॥सिवा॥मिवा॥स्थिवा॥दधातेर्हिः॥हिवा॥ ॥जहातेश्चक्लि॥
॥ग्रस्यहिःस्याक्लिहिवा॥दाऽद्यसुहाःत्वा॥ग्रदोजग्धिः॥जग्धा॥ ॥समासेनञ्स्वैस्कोल्यश॥
॥ग्रनञ्स्वैसमासेसतिक्रोल्यपूर्वादेशःस्याद्॥उकृ॥यकर्णेकृत्वा॥ग्रकृत्वाग्रनञतकिं॥ग्रत्वा॥
॥षत्वउकोरसिद्धःषत्वेउकित्वर्त्तव्ये
एकादेशोसिद्धःस्यात्॥कोस्याग्रत्रएडःपदांतादित्येकादेशस्यासिद्धत्वान्नषत्वंग्र
धीत्यादेत्या॥ग्रत्रएकादेशस्यासिद्धत्वाद्धस्येतिउकृ॥वाल्यपिग्रनुदात्तोपदेश २१५
स्तत्रोक्तानोल्यपिपरत्वाउनासिकलोपःस्याद्॥विवस्थितविकल्पत्वात्मीतानि

दोवानिनिटंवत्वोक्त्यादीनांवनित्यो॥ग्रागत्या॥ग्रागम्याग्रणत्याग्रणम्याग्रहत्याग्रम
त्या॥वितत्याग्रडोल्यपिवीत्यावानेतिकेचित्॥ग्रदड्ग्याग्रदोजग्धित्यत्रिकितियजजग
ग्रंतरंगत्वात्यागेवजग्धोसिद्धेपित्यखुक्तेङीयतेस्मित्दवत्ग्रावडत्वेदीर्घेवष्टत्डडूवि
धयोल्यपिनस्फरितिनल्यपित्यपिपरत्वमास्कादेरीत्वेनस्यात्॥विधायाग्रदाय
॥ग्रस्वन्याग्रस्थायाग्रक्रमायाग्रश्च॥ग्रदीत्याग्रपद्याएङहित्वाद्यनावःग्रमायाक्षमा
यागयायाग्रहायाग्रसायाग्रशायाग्रछायमिनासिमिनोत्रीत्यात्वं॥ग्रमायोनिमाया
ऽपदायाविनाशालीयतेविलोपविलीयणिलोपःङित्त्वायोविवार्यात्यपिलघुश्चर्वो
रालघुश्चर्वीत्यस्यणेरयादेशःस्याद्॥त्यपिविगणय्याग्रणमय्याग्रवदय्यालघु
श्चर्वीक्तिसंग्रक्षयेविनाशायः॥ग्रान्नातेणेरयादेशोवास्यात्यपियाग्रप्याग्रा

प्यामपतेरिदन्यतरस्यां॥ ॥मेङ्-इकारोंतादेशःस्याद्वाल्पेपिस्रपमित्यास्रपमाय॥ ॥
ल्पेपिव्यावेलोल्पेपिसंस्रसारणंनस्यात्रावयाय॥ ॥ज्याश्च॥ ॥ज्याऽल्पेस्यतथा॥ज्या
यांव्यश्चवेन्नोल्पेपिसंस्यसारणंस्यात्रव्यायउपव्याप॥ ॥विन्नाप्तायरेः॥ ॥परेर्वे
जोवासंस्रसारणंस्याल्पेपिङ्केवाधिवापरस्माद्वलश्तिदीर्घः॥परिवीयःपरिव्या
यासमीवेत्पेकोसंवीयःसंव्यायःतत्कालोपिस्काक्वचिदास्रंव्यादायसुपितिनेत्रे
संमील्यहसति॥आनीस्तोणसुत्वाध्वतोस्रवैकालेणसुलस्यात्योनःउणेक्वानि
त्यवीप्सयोः॥स्मारंस्मारंनमतिशिवंस्मृत्वास्मृत्वावाणयंनोजोविणसुलोदीर्घइ
तिणिचिवादीर्घः॥गामेःगामेःगमेःगमेःविन्नाप्तावित्यसुलोरितिसुश्चालेनेःलेनेः २१५
लानेःलानेःघाटेःउश्लेनेःएंपतजायुसुजागरेःजागरेःरइत्यादिःज्ञेयः॥कर्मण्यः

क्रोशेक्तनःखमञ्चाकर्मण्युपपदेक्तनःखमञ्चास्यात्रात्रक्रोशेगम्येवोरंकारमाक्रो
शतिःचोरोसीत्याक्रोशतीत्यर्थः॥ ॥स्वाडभिणसुलःस्वाडर्थेसुक्तोणसुलस्यादेकक
र्टकयोःसर्वकालेस्वाडंकारंचक्रेःमांतत्समविकारार्थात्रस्वाहंस्वादंचक्रेःस्वाडं
कारंचक्रेःसंपन्नंकारंवासरूपेणक्वापिस्वाडंकृत्वाचक्रेः॥ ॥अन्यथैवंकथमित्ठ॥
सुसिद्धाप्रयोगश्चेत्तएतपपदेक्तनोणसुलस्यात्रसिद्धःअप्रयोगोयस्यतथाभू
तश्चत्यर्थेत्वतप्रयोगानर्हः॥इत्यर्थोन्यथाकारंएवंकारंकथंकारं॥इत्थंकारंचक्रे
इत्थंचक्रेइत्यर्थः॥सिद्धेतिकिं॥अन्यथाकृत्वाशिरश्चक्रेःवापिएवंकृत्वात्रि॥
यावतिविदंजीवाः॥ ॥यावत्सुपपदेन्यांणसुलायावद्वेदंचक्रेःयावज्जीवम
धीयतेःनिश्चलसश्चलयोःकर्मणोःणसुलस्यात्रकर्मादिसुप्रथाविधा

MEMORIAL

ञप्रयोगः॥कारवादिषुमध्येयस्माण्मुल्लुक्तसएवाञप्रयोज्याःधमञसंबंधेसिद्धेपि
नियमार्थमुक्तिः।निश्मलकावंकृषतिसश्मलकारंवकरवतिासश्मलंकषतीत्यर्थः॥ ॥
श्मुकवर्णरूक्षेषुपिषः॥एषुकर्मसुपिर्षेर्णमुल्स्याद्वाश्मुक्षंपेषंपिनष्टिाश्मुक्षंपिन
ष्टीत्यर्थः॥इत्यादिासश्मलाकृतजीवेषुहरहर्जग्रहः॥ ॥एषुकर्मसुकृमेणहंत्यादे
र्णमुल्स्याद्वासश्मलघ्नांतेहंतिाश्मकृतकारंकरोतिाजीवयाहंदृङ्क्तिाजीवंदृङ्क्तती
त्यर्थः॥ ॥करणेहनः॥ ॥करणेउपपदेहंतेर्णमुल्स्याद्वापादघ्नांतेहंतिपादेनाहं
तीत्यर्थः॥ ॥स्नेहनेपिषः॥ ॥स्निग्धंयेनतस्मिंकरणेपिषेर्णमुल्वातिलेनापिनष्टीत्य
र्थः।हस्तेतार्त्तीयहोः।हस्तार्थेकरणेआन्यांणमुल्स्याद्वाहस्तंवर्त्तंवर्त्तयतिाकरंवर्त्त
हस्तयाहंदृङ्क्तिाकस्याहंाकरेणझङ्क्तीत्यर्थः॥ ॥स्नेहेसः॥ ॥स्नेहाभिनिकरणेसुबे

र्णमुल्स्याद्वास्नेहोंऽक्तृन्क्तिास्नेनक्तृन्क्तातीत्यर्थः।पर्य्यायाणंविशेषाणांचाञग्रहण
मिष्यतेाधनयोषाःगोपायंघ्नंदोतद्विशेषाणांस्नेपर्य्यायिविशेषयोःपर्य्यायस्यैवग्रा
दोमस्यादोतद्विशेषयोः॥ ॥उपमानेकर्मणिवा॥ ॥येनकर्मकर्त्रोवाउपमीयतेतत्रोप
पदेणमुल्स्याद्वारत्ननिधंयेनिधंत्तेारत्नमिवविधत्तइत्यर्थः।अजनाशंनष्टः।अजश्चन
ष्टइत्यर्थः॥ ॥उपदेशस्तृतीयायां॥ ॥तृतीयांतोपपदादुपदेशेर्णमुल्स्याद्वाश्म
लकोपदेशंदेक्तेाश्मलकेनोपदेशंदेतीत्यर्थःश्मलकंदेतितिवासमासः॥ ॥अपादानेपरी
प्सायांञरायांगम्यायामाप्तौक्तोपपदाद्धातोर्णमुल्स्याद्वाकर्षादिलात्तावाद्यया
विधञप्रयोगोनाद्यांछायंप्राप्नवतिाशय्यायाउच्छायंप्राप्नवतीत्यर्थः।द्वितीयायांत्व
॥ ॥द्वितीयांतेउपपदेधमतोर्णमुल्स्याद्वाञरायांयष्टिंहस्तंधमतेायष्टंहरतीत्यर्थः

धांतश्चत्यर्थे ः॥ ॥अव्ययेयथाभिप्रेताज्ञानेऽजः द्धाणमुलोऽव्ययेऽपपदेऽजः ए
तोसः॥अप्रियस्योद्यैः।प्रियस्यजीद्यैःकथनेऽद्यैःकृत्याऽद्यैःकृवाऽद्यैःकारंवाऽप्र
प्रियंब्रूतेनाद्यैःकृत्याप्रियंब्रूतेऽकृत्यादयःकृतोज्ञेयाः।दिङ्मात्रमेतदुक्तं॥ ॥इतिकृ
दंतप्रक्रिया॥ ॥वैदिकशब्दशेषेवप्रक्रिया।यएवलौकिकाश्चएववैदिकाश्चतिन्या
याऽ॥क्वचिदन्ययोगवशादन्यथावेत्रकृत्यांतःपादमध्यपरेऽकपादमध्यस्थएङ्
प्रकृत्यास्यादतिपरेनउचकारयकारपरेऽतिऽउपप्रयंतोऽध्वरेसुजातेऽश्वस्य
वृतेऽतःपादेकिंयएतेचयंतिऽत्रव्यपरेकिंतेऽवदन्तेयमयो॥ ॥अव्यादवघाद
वच्चक्रुरुरुत्रायमवंत्ववस्युश्चाएकुसप्तसुव्यपरेयतिएङ्प्रकृत्यावसुनिर्नोऽत्र ११७
व्याऽमित्रमहोऽतघाऽमाशिवासोऽवक्रुः।तेनोअत्राशतधारोऽयंमणिः॥

तेनोऽवेऽऊशिकासोऽवस्यवःयजुष्पुरः॥ ॥उरःशब्दाडेतोतिपरेऽत्यायजुष्किऽउरो
ऽंतरिक्षेऽआडोऽनासिकाछंदसिऽआडोनुनासिकादेशोवित्रकृत्याऽत्रऽओपः।षष्ठ्या
ःपतिपुत्रपृष्ठपारपदपयस्पोषेशुश्वष्टीविसर्गस्यसस्याद्धलंछंदसिपत्यादौपरेवा।
वस्पतिःदिवस्पुत्रःइत्यादिसःछंदसिबहुलं॥ ॥स्याइत्यस्यसोलोपिःस्यात्बहुले
ऽपिस्यात्वाजीबहुलेकिंयत्रस्यानिपतेत॥ ॥त्र्यंबकादीनिछंदसि॥ ॥नाथा
योऽपदसंज्ञाऽत्र्यायेतत्वादीनांविकल्पेनयडुवङौऽपेनुमतवे॥विश्ववेपश्यस्व
गोलोकःसुवर्गोवाऽत्रकोऽत्र्यंबकोवरेण्यंवरणीयं॥ ॥छंदस्युभयथा॥
॥न्नसुधियोर्यणस्यादियङुवङौचावनेशुचित्रेविचेविश्ववेदाःसुधियोकृत्य
मग्नेसुध्योवाऽआजसेरसुक्रु॥ ॥अकारोऽजसोऽसुगागमःस्याऽ॥छंदसिवा

ह्मणासः॥ ॥वङ्कलंछंदसि॥अतोन्निसऽएसबङ्कलेस्याऽछंदसि॥एत्तंदेवेत्तिः॥
मंत्रेथाद्यादेरात्मनः॥ ॥आडितिहातस्मिन्परेआत्मनश्चाद्यस्यदेर्लोपःस्यान्मे
त्रेष्वात्मनादेवेत्यःअन्यत्रापिलोपःआत्मन्यासमंजत॥ ॥सुयोसुलुक्॥सुवेसवर्णो
छेयाडाद्यायाजालः॥ ॥सुयामेतेआदेशास्युःऋजवासंतुपंथाःपंथानइतिशसि
जसःसुः॥आईचमेत्र॥वर्मणीतिशसिलुक्॥नडिसंबुद्धोरितिनलोपोनामतीमन्पा
इतिशसिसवेसवर्णः॥सख्यायास्यदायोइतिशसोत्रैकारस्यआनतावत्रास्त्रणे॥नतेऽ
तिशसिअमआत्रा॥अस्मेऽक्षाहृदस्यतीनयुष्मेवाजबंधवः॥वयंह्यायमितिशसिजसः
शीत्ययवयादेशानावश्छंदसवाऽऽऊघाऽऽऊणेतिशसेयाना॥नानाहृथिव्याः॥नानो, ११८
इतिशसिजसअङ्गायजामसिअत्रुनाइतिशसेआसाधुयाः॥साध्वितिशसेयाऽव

संतायजेतावसंनेइतिशसेआनयंडियाऽईकारश्चाजनियाःदार्वियाऽऽऊणादारू
णेतिशसिइयाऽसुङ्क्षेत्रियाःसुङ्क्षेत्रिणेतिशसिडियाऽसएमीशयानंसरसिऽ
तिशसेईकारः॥आङ्॥अयाङ्॥सुयोसुपोस्तवंतिघुरिदक्षिणायाःदक्षिणायामि
तिशसितिर्जातिङोस्तवंतिवेद्यायतद्धराततद्धतीतिशसेसयाऽप्रवोढ्वाऽबा
ङ्नेतिशसेसुघ्यास्वघ्नेनेतिशसेनावयानावाइतिशसेयसस्तुपोडुः॥पा
दस्यरणेएषांद्वेस्तः॥पादस्यरणेयद्यायमग्निः॥ससमिद्धवसोजयोयमेपमेप
रामृत्राकिन्नोऽद्यधंसेअमोमश्रमियादेशस्यामोमश्रस्याऽवधीद्वत्रेअ
वधिषमितिशसेध्वमोध्वाऽधिस्थानेध्वास्याऽध्वरयध्वात्वध्वरयध्वमितिशसे॥

मजध्वेनमिति च। एनमिध्वमिति लोपः। अजध्वेनं प्रियमेधाः। तस्य तातस्य लोपे मध्यमबहुवचनस्य तातस्यात्। गमयतातगमयतेति प्राप्ते॥ ॥तशूनश्तनथनाश्च॥ ॥एतेवतस्यादेशाः स्युः। तप्। मृणोनग्। वाणः। तस्य पदस्य नातस्य जुङ्कृतन्॥ थस्य। यदिथस्य शृणुतात्। घस्य। जुङ्कृतश्चेति प्राप्ते॥ ॥इदंतोमसिमसि शादेश्च तस्य कारः स्यात्। सुरस्यादीपयामसि। दीपयामश्चेति प्राप्ते। स्नाभ्यादयश्च॥ ॥एते निपात्याः। स्नाव्यीमलादिवस्नावेति प्राप्ते पीव्यपीव्यश्चेति प्राप्ते। छंदसि शायजपि दृश्यः। शायजपि स्यात्। छंदसि दृग्रहोर्भः। छंदसि गृनाग्राह्यृहणेत्यर्थः। जनात्। जहारेत्यर्थः॥ ॥व्यत्ययोबहुलं॥ ॥शवादिविकरणानां

छंदसि बहुलं व्यत्ययः स्यात्। नेदति। क्तिनस्तिङ्। इतिप्राप्ते मरति। म्रियतइत्यर्थः॥ बहुलोक्तिः सर्वविधिव्यभिचारार्थः। सुसिङ्। पग्रहालिंगनरणाकालहलस्वरकर्तृसडोश्च व्यत्ययमिच्छति। शास्त्रकृदेषां सोपि वसिध्वतिव्याङ्लुकेनउपग्रहः परस्मैपदात्मनेपदानां यथमनुरुषादि लिङ्याशिष्याशीर्लिङि। ध्वतोरङ्। यत्ययः स्यात्। छंदसि। यासुटिकृतो। अतोयेसः। स्कोयोगेयंगमेमाव्यत्ययः॥ वोचेमाविदेयोरुहेयोदृशेयोः॥ ॥छंदस्युभयथा॥ ॥ध्वन्वधिकारोक्तः सर्वोपि यत्ययः सार्वधातुकार्द्धातुकसंज्ञः स्यात्। छंदसि वर्द्धउवर्द्धेत्वित्यर्थः। आर्द्धधातुकत्वात्तिलोपः। विशरेसुत्विरे॥ ॥लिङर्थेलेट्॥ ॥लिङर्थेविध्या

दोधुनोर्लेट्यत्यय्यः स्याच्छंदसि सिलुक्लंलेटि॥ ॥धुतोः सिशृत्ययोर्वलुक्लेस्याल्लेटि॥ ॥इतश्चलोपः परस्मैपदेष्वलेटस्तिडामितो लोपेवास्याश्च॥परस्मैपदेषु॥लिटो डाटोलेटश्चाट्आटूतावाद्यमोस्नः॥तौस्वपितौजोषिषतातिषतामंदिषता पक्षेपतांदिदिक्षाउदधिंच्यावयामि॥ ॥सउन्नमस्य॥ ॥लेट्उन्नमसकारस्य वालोपःस्याच्चकरवावापक्षेकरवावःटेरेत्रे॥ ॥आतएे॥ ॥येट्आकार स्यएेस्यात्॥मंक्ष्वेथे॥विधिसामर्थ्यादेटएत्रेनमंत्रयेतां॥ ॥वैतोऽन्यत्र॥ ॥आ तएेविषयंविनालेटएकारस्यएेस्याद्वा॥पक्षेक्ष्वसाएेतोन्यत्रकिंमंत्रा यते॥उपसंवादाशंकयोश्च॥ ॥प्रणवेधेआशंकायांवलेट्स्याच्चाग्रहमेवा

वपश्चनामाच्चोविडिह्लायंतोनरकंपतामा॥ह्वमदरुहिन्यःछंदसि॥एन्यःश्नेरङ्स्याछंदसि अकरच्चाअमरच्चाअदरच्चा॥अरुहत्वाअुष्टएष्ट वृन्यःछंदसि॥एन्योहेर्धिःस्याच्छंदसिअुघीहवाअुणुधीगिरः॥॥अन्येषामपिदृश्यतइतिदीर्घः॥॥धृषिौउरुणाकृधिौअपाहधिवाछंद सिहिरपिह्लास्याच्छंदसि॥आडितश्चापिवेनाडितोहेर्धिस्याच्चारारंधिष्वंधिष्वोधिपित्वा न्नावाश्रीणीहि॥ ॥आदेगामहनजनःकिकिलोलिङ्वा॥ ॥आदेतादवर्णोताङमादेश्च किकिनोस्मच्छंदसितौवलिङूत्वद्विवापिःपकिवेाच्छत्संतांगुणवाक्षर्थेवङ्लंछंदसीत्व त्वेाजयुरिःजगमिःजघ्निः॥उमर्थेसेसेनसेत्रसेङ्सेकसेरध्यैअध्यैच्चकध्यैकध्यैच्चशध्यै शध्यैच्चातवेतवेङूतवेनः॥ ॥क्षतोरेतेष्वत्वाःस्युछंदसिउमनोर्थेसेावङ्लेराध्यैसेच्॥ता वामध्यैअसेअसेच्चाजीवसेऊधर्यवाकसेच्चश्रियसेअध्यैअध्यैच्चआचरध्यैकध्यैकध्यै च्चआऊवध्यैचोध्यैशध्यैच्चापिवध्यैमादयध्यैतवैयातवैतवेङ्सूतवैतवेच्चकर्त्तवैवाकर्ते

मित्यर्थः। अयेरो हिंसो। अव्यथिष्यो एतनिपात्याः। अत्यानुरादुं। अव्यापित्रमित्यर्थः॥ दशविरव्यत्र
निपात्यो। ईक्षुविरव्यात्रमित्यर्थः॥ ईश्वरतोसुकसुनो। ईश्वरशपपदधातोरेतोसुमर्थेईश्वरा
दिचरितोः। ईश्वरो विलिषः॥ ॥कृत्यार्थतवेकेन्केन्यत्वनः॥ धातोरेतेसुः कृत्यानामर्थसाद
कर्मणोः॥ तवे। अवेतवेकेन्। अयगाहोकेन्यः। दिदृक्षेण्यः। त्यकत्वासृष्टिदोः कसुन्। त्यो
त्योकसुनस्याऽवलक्षणेनुमर्थेपुराक्रूरस्यविसृपोविरप्शिन्॥ पुराजनेन्यत्रादृदः। ऋ
जनःसनंताछंल्यतोलोपः॥ तस्यश्वरंप्रतिष्ठानिवत्तावात्॥ ॥लितिलितिपरेत्वं
मुदात्तेस्यादितिईकारस्योदात्तता। विकीर्षकः॥ अदेः क्तिनिक्तेव्यङ्गलंछंदसिविघस्व
घस्निनसोर्हलिलेत्युपधालोपः। मलोमलीतिसलोपः। घञोगयोर्लोपस्यस्थानिवत्वात्
घस्यङङ्॥ समानाग्धिः। सग्धिः॥ इत्यादिप्रयोगमनुसृत्यानुरक्षातव्यं॥ ॥इतिवैदिकी
प्रक्रिया॥ ॥आनंत्यात्सर्वशःशब्दोनशक्यतेनुशासितुं। बालमुत्पत्तयेस्मात्तिसंक्षिप्ता

क्रियाकौमुदीसेयंरामचंद्रप्रकाशिता। अस्यचस्मोवध्मस्त्रकौ
स्त्रियाविराजयतिमुक्तगस्त्रितिर्मुग्धहासावलोकः॥ घशाभितजनंयोविहलस्वा
न्तदीपः। सचकितमिवलक्ष्मीसेवतेयत्पदाब्जेललिततरकरान्यंसाधुसंवाहयंती
॥ ॥इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमहीपालाचार्ययुरुब्रह्मप्यश्री
मद्रामचंद्राचार्यकृताप्रक्रियाकौमुदीसमाप्ता॥ ॥शुभमस्तु॥ ॥संवत्१९१०
वर्षे॥ माघवदि५बुधेश्रीतोडाडुर्यंतप्समीपेवोजासंकरुरोवर्त्तेज्योतिश्रीपरि
पुरामतत्प्रज्योतिषीत्तवानीदासईश्वरदासेनइदंप्रक्रियाकौमुदीहिरण्यार्थलोपि
तं॥



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

लेटः सिप्रत्ययकरणः वैकल्पिकः ॥ अडागमोः आडागमोवा
सिपोणिच्चंवा ॥ इकारलोपोवा ॥ सुकारलोपोवा ॥ ८२
आकारऐकारः ॥ तदतिरिक्तेएकारस्यैकारोवा
तत्रभूधातोः सिपिलेटि णिच्चे अटि
+परस्मै+

भाविषत् । भाविषति
भाविषतः
भाविषन् । भाविषंति
भाविषः । भाविषसि
भाविषथः
भाविषथ
भाविषं भाविषमि
भाविषव भाविषवः
भाविषम भाविषमः

अत्रणिच्चाभावेसार्वधातुके
तिगुणेभविषतीत्यादि ॥ आटि
भाविषाति । भविषाती त्यादि ॥

सिबभावेरूपं आटि
भवति । भवत् भवाती त्यादि
भवतः
भवंति । भवन्
भवसि । भवः
भवथः
भवथ
भवमि । भवं
भवावः । भवव
भवामः । भवम

SHRI BHAU DAJI
MEMORIAL

संकलनेनवमीकृपा

भूधातोः लेटि आत्मने-सिपिणिच्चे अटि

भाविषते भाविषते
भाविषेते
भाविषंते भाविषंते
भाविषसे भाविषसे
भाविषेथे
भाविषध्वे भाविषध्वे
भाविषे भाविषे
भाविषवहे भाविषवहे
भाविषमहे भाविषमहे

णिच्चाभावेभविषतेइत्यादि
आटिभाविषातेभविषातइ
त्यादि ॥

सिबभावेरूपं अट्
भवते । भवते आटिभवा
भवेते तेइत्यादि
भवंते । भवंते
भवसे । भवसे
भवेथे
भवध्वे । भवध्वे
भवे । भवे
भववहे । भववहे
भवमहे । भवमहे

संकलनेषष्णवमीकृपा